त्यर्थः। यद्येवं कुतो दिग्भेदः कथं दशदिशा इति प्रसिद्धिरत आह। दिगितिं गौतीति प्राञ्च साधुरस्मया दत्या इति परमर्षिभिः सर्गादि तवै मेरो
स्यादिनिर्देशविधानाः संज्ञाः कृताः॥ किमर्थं श्रुतिस्मृति लोकव्यवहारार्थं। प्राचीनप्रवणे वैश्वदेवेन यजेत। न प्रतीचीनशि
राः शयीतेति श्रौतो व्यवहारः। आयुष्यं प्राङ्मुखो भुङ्क्त इत्यादि स्मृतिः। दक्षिणेन याहीत्यादि लौकिकस्तदर्थं ताः कृताः। किं
पारिभाषिक्यो नेत्याह अन्वर्थाः अनुगतार्थाः। केषां भगवतः सवितुर्यः संयोगविशेषास्तेषां। कथं भूतस्य सवितुर्मेरुंप्र
दक्षिणमावर्तमानस्य। परितो भ्रमतः। पुनः केषां अन्वर्था इत्यत आह लोकपालपरिगृहीतदिक्प्रदेशानां। लोकपाला
इन्द्रादयः। कथं ताः सवितृसंयोगविशेषानुगमेन दशविधाः संज्ञा इत्यत आह। प्रागादिभेदेन। तथाहि। प्रथमसंस्थामें
वतिसवितेति प्राची। अवागस्यां संचातीति अवाची। प्रतीपमस्यां संचरतीति प्रतीची। उदग्गस्यां संचरतीति उदीची। ए
वं प्राग्वाची अवाक्प्रतीची प्रत्यगुदीची उदक्प्राची। यद्यपि देशापायतः प्रपृथिवीसाधस्तात्पृथिवीत्यपेक्षयापत्तौ नदृत्रा
ति साऊर्ध्वा। ततो न स्वोपचारेण दशदिशः सिद्धा इत्येकत्वाविरोध इत्यर्थः। ननु लोकपालपरिग्रहनिबंधना भिः सह

मत्वा विंशतिर्दिशः स्युरित्यत आह तासामेवेति। येवास्माकं प्राची सैवन्याहं दी॥ भिन्नमात्रं भिद्यते न तु नैमित्तिकमित्य
र्थः॥ उपलक्षणं चैतत्। पूर्वापरादिसंज्ञा अपि तत्समानार्थाः ननु भिन्नार्थप्रवृत्तिनिमित्तत्वात् कथं दिश एकत्वमिति। उद्देशक्रमानुसारेणा दि २
ति३ दिग्लक्षणानन्तरं आत्मलक्षणमाह। आत्मत्वेति। आत्मत्वं नाम सामान्यविशेषः। तदभिसंबंधवानात्मेतरेभ्यो भिद्य
ते इति पूर्ववद्व्याख्यानं। ननु यद्यपि नश्वरशरीरादिव्यतिरिक्तमात्मानमुपलभामहे। गौरोऽहं स्थूलोऽहं ब्राह्मणोऽहं मानुषोऽहं
गच्छाम्यहं तिष्ठाम्यहं जातोऽहं पितुः पुत्रः पिता पुत्रस्य पिता ज्येष्ठस्य कनीयान् कनीयसो भ्रातेति गुणकर्मसामान्य
सामान्यविशेषतन्मात्राद्यधिकरणतामात्मानं वहतुरादिनैव सर्वैः प्रत्येति। न तत्स्वरूपं विलक्षणमवगमनं तमजमपूर्वं प्रत्यगा मद
त्मानं कश्चित्त्वपेक्ष्यनुभवतीत्याशयासिद्धमात्मत्वम्। यथा प्रसिद्धं च यं प्रथितमाहुर्नागतार्थः। तथा ह्यहं जाने अहं
भुञ्जे इति ज्ञाताद्यधिकरणतया मनसात्मानुभूयत एव। अहंकारस्य शरीरादिविषयत्वं वाग्ग्रे निषेत्स्यत इत्यभिप्रा
यः। तथाप्यात्मत्वं स्वरूपासिद्धं परमात्मनोऽप्रतीतेः। प्रकृतेर्न दासिद्धौ सामान्यविशेषासिद्धिरित्यत आह तस्येति।
सौक्ष्म्यान्नीन्द्रियग्रहणयोग्यताविरहः। तस्मादप्रत्यक्षत्वे तस्य करणैः श्रोत्रादिभिः समधिगमः क्रियते। ननु क
रणान्यप्रत्यक्षाण्यत आह शब्दाद्युपलब्ध्यानुमितेः। शब्दाद्युपलब्धयः करणसाध्याः क्रियात्वाच्छिदिक्रियावत्।

इत्यनुमितेः। कथं पुनः कारकाणां समधिगम्यत इत्यत आह वास्यादीनामिति अनेन व्याप्तिं दर्शितां। प्रयोगस्त्वेवं। श्रोत्रा
दीनि कर्तृव्यापारफलानि करणत्वात् वास्यादिवत्। करणत्वं वा मीषां धर्मिग्राहकप्रमाणसिद्धं। ननु कस्यचित्तु करणस्य
वास्यादेः पारण्यादिकरणप्रयोज्यत्वदर्शनेऽपि यथा न सर्वेकरणां करणप्रयोज्यमनवस्थाप्रसंगात् तथा कस्यचित्
करणस्य कर्तृप्रयोज्यत्वेऽपि न सर्वेषां तथात्वं व्याप्तिस्तत्र के विरोधः। उच्यते। कारकेषु समानजातीयकारकापेक्षा
नियमो नेष्यते। अनवस्थाप्रसंगात्। विजातीयकारकापेक्षानियमस्त्विष्यत एव। अन्यथा तक्षणाद्याघातात्। वृक्षा
रादीनां कर्त्रनपेक्षत्वे तत्साध्यक्रियाप्रतिसंधानानुपपत्तिप्रसंगात्। तस्माद्ध्यासौ श्रोत्रादीनामेकोऽधिष्ठाता स आ
त्मेति। प्रमाणांतरमाह यद्वाक्षादि ष्ठितिः। प्रसिद्ध्या ज्ञानेन प्रसाधकोऽज्ञातानुमीयते। तथा हि। ज्ञानं क्वचिदाश्रि
तं कार्यत्वात् गंधवदिवत्। कार्यत्वमेषामस्मदात्मादिविलक्षणं प्रत्यक्षसिद्धं। कार्यस्याप्यनाश्रितत्वे समवायि
कारणव्यावृत्तौ इतरयोरपि व्यावृत्तेरकारणकत्वप्रसंगः। तथापि शरीरेंद्रियमनसामन्यतरस्मिन्नाश्रितं
न विष्यतीत्यत आह न शरीरेंद्रियमनसां चैतन्यमित्यग्रे न विष्यति। कुतः। अज्ञत्वात्। अज्ञत्वं व्याप्त्यैवैतेषां
सिद्धत्वादित्यर्थः। एतदेव दर्शयति न शरीरस्य चैतन्यं न शरीरं चैतन्याश्रयमित्यर्थः। घटादिवत्। तत्र कार्यत्वा

दिति। सतत्वात्कार्यत्वाद्वेत्यर्थः॥ ॥ अन्यथा उभयमपीविशेषणोर्हेतुस्यात्। ननु चैतन्याश्रयत्वे कार्यत्वस्य सतत्व
स्य वा को विरोधः॥ ॥ अत आह मूर्तेत्यादि। संभवादिति। पदिति शरीरविशेषगुणस्यैव चैतन्यं भवेत् रूपादिवद्यावद्द्रव्य
भावित्वं भवेत्। वक्तुरयावत्पृथिव्यादिव्यक्तिभावित्वं भवेत् पृथिव्यादिशरीरविशेषगुणस्य यावद्द्रव्यभावित्वनिय
मात्। पृथिव्यादिरनुष्णविशेषगुणस्य च यावत्पृथिव्यादिव्यक्तिभावित्वात्। ॥ अत्राप्यनियमे को विरोध इति चे
त्। शरीरस्य कार्यतयोत्पत्तेः॥ प्रागनुभवाभावेन संस्काराभावात्। स्मरणानुसंधानानुपपत्तिरित्येतत्तर्कप्रदर्श
चै ६ नार्थमेव कार्यत्वस्योपादानमित्यवधातव्यं। नेन्द्रियाणां तस्मिन्ननुवृत्ते। कुतः करणभावात् कुठारादिवदि
ति शेषः। उपहतेष्विति। अनुभवानुविधायितया तावदनुभवकार्या स्मृतिः। सोपि यद्यन्तराकेचिदतिशयं नाद
ध्यात्। विरुद्धस्तो न स्मृतिं जनयेत्। अनुत्पन्ननिरन्वयध्वस्तयोरविशेषात्। अतिशयमप्यादधानः स्वसमा
नाश्रयमेवादधीत। अन्यत्राधाने त्वतिप्रसंगः॥ तस्मात्स्मृतिसंस्कारानुभवाः समानाश्रया इति नियमः। तथा चेन्द्रि नि ३
येषु चैतन्याश्रयेषु स्वीक्रियमाणेषु। तेषामु[illegible]पघाते। अंधादिभिः पूर्वानुभूतानां रूपादीनामस्मरणप्रसंगात्।
घटादीनां विषयाणां कारणानां च कुठारादीनामचैतन्ये जीवनविरहो[illegible] हेतुः। तत्राप्याध्यात्मिकवायुवि

56

रहः। ननु तत्रापि बाह्यघ्राणोपसंहाराभावः तत्रापि तत्स्यादेव भावः। अत्राप्येतत्संक्लृप्तमिति। विषयासान्निध्येनेति। य
दि हि विषयाः स्युस्तेऽनु तेषामसन्निधानेनानुस्मृतिर्न स्यात्। असन्निधिश्च नाशहेतुको द्रष्टव्यः। न ह्यसत्स्वनु
भवितविषयस्मरणमुपपद्यते कारणाभावादिति भावः। अनुभूतानां स्थायित्वेन स्मृतिरेवानुस्मृतिरुच्यते।
अस्तु तर्हि नित्यत्वात्सर्वविषयत्वाद् ज्ञातृत्वाच्च मनस एवेत्यत आह नापि मनस इति। अयमभिसंबन्धिः। ज्ञा
नाश्रयतया मनोऽनुमीयमानं कर्तृ स्यात् न तु करणम्। तथा चायुगपदर्शनेकविषयसन्निधानेनेकचक्षुरादि
करणाधिष्ठानेन युगपदनेकान्याज्ञानानि अनेकाश्च स्मृतीरारभेत। न हि करणवत्कर्तुरवचं मीयदेक
देकमेव क्रियामभिनिर्वर्त्तयति। तथा त्वेवात्मसंयोगेन स्यात् कारणं तररापेक्षायां च संज्ञाभेदमात्रं। अथ क
रणतयैव तदनुमाने ज्ञानाद्याश्रयतयातदनुमास्यत इति। आह स्वयं करणाभावाच्चेति सिद्धे चैतन्याश्रये कर्तृ
रि करणं मनोऽनुमीयते। तथा च धर्मिग्राहकप्रमाणबाध इत्यर्थः। दिक्कालाकाशानां च प्रसक्तिरेव नास्ति। ते
षां बुद्ध्याश्रयत्वप्रतिक्षेपे लोकशास्त्रादिभिरुपस्थापनात्। अतः पारिशेष्यात् आत्मसम्प्रतिषेधेऽन्यत्राप्रसङ्गात्
शिष्यमाणतया। आत्मकर्मकार्यत्वात् पृथिव्याद्यसमवायित्वे सति कार्यत्वादित्यर्थः। तदयं प्रयोगः। ज्ञानं पृथि

व्याघ्रपकुल्यातिरिक्तद्रव्याश्रितं तदन्याश्रितत्वे सति कार्यत्वात् यत्पुनः पृथिव्याद्यतिरिक्तद्रव्याश्रितं न भवति । तच्च तद
नाश्रितत्वे सति कार्यं न भवति यथा गंधादि इति केवलव्यतिरेकी स्यादेतत् आत्मत्वहेतुसिद्ध्यर्थं परमात्मप्रसाधना
र्थे खल्वयमारंभः यथा रूपमात्मा परोक्षः तथा तद्बुद्धिरपि परोक्षैव तथा चर्किकेन साध्यत इत्यत आह । शरीरसमवायिनी
भ्यामिति । विग्रहस्याधिष्ठातृत्वविवरणं प्रयत्नवानिति तात्पर्यं यो ऽतिशेषः । (लिंगमाह शरीरसमवायिनीभ्यामिति) भ्यामिति । वि
ग्रहस्याभित्यादेरयमर्थः । अनयोः प्रत्येकमेव लिंगत्वात् क्रियामात्रस्यानैकान्तिकत्वमाशंक्याह हिताहितप्राप्तिपरिहा
रयोग्याभिति । हितं सुखसाधनं अहितं दुःखसाधनं तयोर्यथाक्रमं प्राप्तिपरिहारौ तयोर्योग्या याभ्यामिति । योग्यग्रहणं
वृक्षादिवृत्तं तरायसंभवेन प्राप्तिपरिहारयोरसिद्धावपि चेष्टात्वस्य प्रयोजकत्वमादर्शितुं । एवं च तेव च निवृत्ती प्र
येन शरीरतदवयवसमवायित्वाविशेषेण अरुमवायिनीभ्यामिति स्वरूपमुक्तं । यथा चलनादीनामपि शरीरत्वं तयो
ऽत्र तेषां बाधः स्यात् तत्र यत्नेवा अत्र दृष्टान्तः रथकर्मणा सारथिवदिति । अत्र प्रयोगः विवादाध्यासितं शरीरं प्रयत्नवदधि
ष्ठितं हितप्राप्तियोग्यक्रियावत्त्वात् । अहितप्राप्तिपरिहारक्रियावत्त्वात् । रथवत् न विपक्षे प्रयत्नव्यतिरेके ऽप्र
प्रयत्नानुपपत्तिप्रसंगः तत्कार्यत्वादिति बाधकं प्राणादिभिश्चेति । अनेन प्राणापाननिमेषोन्मेषजीवनम
मे

57

ई॰

नोगतीन्द्रियान्तरविकाराः सुखदुःखेच्छाद्वेषप्रयत्नाश्चात्मनो लिंगानीति सूत्रं स्मारयति। कथमिति। केन प्रकारेणा
त्वाक्याक्षिप्तिर्गृहीते स्पर्शः उत्तरं शरीरेति। लिंगमलमभिव्यनक्ति विकृतेति। शरीरे परिगृहीतः शरीरान्तरं सारी मनः स
हचरद्वृत्तिपावत्त्वात् कस्मिन्विकृतं स्वभावक्षितस्त्रियेत्यमनादन्याह शंकमीकुर्वाद्योगतिवसतां नद्दर्पनादिभिक्षादि
त्याह केन प्रमाणेनमुक्तं। भस्त्राध्मापयितेवेति दृष्टान्तः। प्रयोगस्त्वेवं। शरीरवर्ती वक्त्रारं तोक्तृप्रयत्नवदधिष्ठितं सम्यक्त्वेनाना
वेसति विकृतक्रियावत्त्वात्। भस्त्रादिवत्। अथवा शरीरे वायुर्नैकृप्रयत्नवत्प्रेरितः। प्रसन्निमृक्तेने वि
कृतक्रियावायुत्वात्। भस्त्रावायुवत्। लिंगान्तरं विवृणोति निमिषोन्मेषेति। अक्षिपक्ष्मणोः संयोगहेतुः कर्म निमेषः
विभागहेतुरुन्मेषः। तेनापि प्रयत्नवाननुमीयते। नन्वेन वायुविकारत्वनिर्णयनस्पन्देनानैकान्तिकमत
आह नियतेनेति। नियमेन यादृग्निमेषोन्मेषकर्मैव प्रयत्नवदन्वयव्यतिरेकानुविधायि दृष्टं तादृशेन त्व
र्थः। अथ किमिदं तादृशत्वं उक्तापूर्वकत्वमिति चेत्। न। स्याप्यसिद्धतयासाध्यत्वात् हिताहितप्राप्तिपरिहार
योग्यत्वस्याविवक्षितत्वात्। अविवक्षितत्वे वा दृष्टपर्वतीनिवृत्तिभ्यामेव गतार्थत्वात्। सत्यं। प्रपंचार्थमुपन्यासः।
अत्रापि प्रयोगः। जीवच्छरीरं भोक्तृप्रयत्नवदधिष्ठितं विशिष्टनिमेषोन्मेषक्रियावत्त्वात् दारुयन्त्रवत्। विशिष्टं वा

नि २ मितेषोन्मेषकर्म प्रयत्नपूर्वकं विशिष्टनिमेषोन्मेषकर्मत्वाद् दारुयन्त्रनिमेषोन्मेषकर्मवत्। जीवनलिंग
कमनुमानमाह देहस्येति। वृद्धिरवयवोपचयः भग्नक्षतयोर्दीर्घच्छिन्नविच्छिन्नयोरस्थिपर्वमांसभागयोः संरोहणं
संघट्टनं तयोर्निमित्तेन तयाधिष्ठातानुमीयते। शरीरावयवानां वृद्धिर्भग्नक्षतसंरोहणो प्रयत्नवन्निमित्ते वृद्धि
त्वात् संरोहणत्वाच्च। गृहकुड्यवृद्धिवत् संरोहणवच्चेति। कृत्स्नैव जीवनशब्दः जीवनकार्यवृद्धिसंरोहणोपलक्षयति। मु
ख्यतो हि स्वकर्मोपार्जितशरीरावस्थितेनात्मना मनःसंयोगो जीवनमिति। क्वचित्संरोहणादिपदं श्रूयते
ते नाहारोपादानमजो रसग्रहणे गृह्यते तेन तथा हि जीवच्छरीरं प्रयत्नवदधिष्ठितं अभिमतानभिमतोपादानोत्स
र्गा[illegible]वत्त्वात्। यन्त्रधारागृहवदिति। नचैतद्दृष्टान्तादिगतं वक्ष्यमाणादिनानैकं। तत्रापि नोक्तविशेषाधिष्ठानत्वस्ये
ष्टत्वात्। लिङ्गान्तरमाह। अभिमतेति। अभिमतविषयो रूपादिस्तद्ग्राहकं करणं चक्षुरादि तेन संबन्धः संयोगः त
स्य निमित्तं कारणं यन्मनःकर्म तेनात्मानुमीयते। गृहकोणेषु व्यवस्थितो गृहकोणव्यवस्थितः तमेव पेलक
मुद्दिश्य पेलकस्य कन्दुकस्य प्रेरकः दारको बालकः तद्वदिति। अयमाशयः। प्रयत्नज्ञानायौगपद्यात्मनस्तावदस्य
त्वे शरीरकमेकमनुगतिमच्चेति सिद्धं तत्प्रत्ययित्वेदमुच्यते। मनः प्रयत्नवदधिष्ठितं गुरुत्वादिकरणान्तराभा

५४

वेसतिमत्वात्। इत्यस्य ग्रिमकेनपेलकवदिति। ॥ अदृष्टापर्संगृहादेवत्। त्रक्रियास्यादितिवेत्। कविदेवमपियध
व्येवमप्या स्मसिद्धिः। तथाप्यभिमतेत्यादिना इक्षानुविधायिनः कर्मेत्तो लिंगत्वेनविवदितत्वात्स्त्रपलवद
धिष्टान्नसिद्धिः। यद्यपिज्ञानविषयः इच्छेवा विषयीक्रियते इक्षा विपक्षप्रयत्नविषयः। स्यात्। मनस्त्वतीद्रियंसद
ज्ञातंकथमेवं भविष्यतीतिचेत्। तथापि स्पर्शेनेंद्रियेयात्मनमनज्ञकुंदे पवहानाडीवन्मनो वहनाडीनामुपलं
भात्। तकेवरा विज्ञाप्रयत्नो ॥ अदृष्टविप्रकर्षेण तदपि व्याप्नुतदुत्तुमनो। ॥ अदृष्टस्यनियामकत्वात्त्वतत्रैवतद
तत्स्वसद्दं। नहि ... जलाद्यस्य वहनर्तो दहेन वोमनोद्यः मर्देहेन वोनाडमः। वक्तुवोपलं ... पंतेनवाननतद्विषयः
प्रयत्नः। ॥ अनाद्यन्यासवासनावशादृदृष्टविशेषनियतंस्यार्शनिमेवप्रत्यहंतत्रकारणमेव ... षितव्यं। तथाप्रक्तोने
पीतिइंद्रियंतत्प्रकारंविद्वत्तोतिनयनेति। नयनस्यवक्तृकोविषयः। विरबिल्वादिरूपंतस्यालेविनंग्रहणं। तस्यानें
तरंरसस्यानुस्मृतिः। तदनंतरंव्याप्तिस्मृतिस्तदनंतरंतथाविधरसस्यानुमानमित्यनेनक्रमेणेंद्रियांतरस्यरस
नस्यविकारोदंतोदकसंप्लवलक्षणः। तद्दर्शनादनुमयदर्शनुमीयते। ऽन्यात्यानुमयं ... द्रष्टुंशाजमस्ये त्युनयद
र्शी। ॥ अनेकज्वाद्वानंतगतप्रदेशैकवदिदितिदृष्टांतः। प्रयोगस्तु। नयनादींद्रियमचेतनंनियतविषयत्वात्ज्ञगवादृवत्।

पक्षत्वेन तो नियतविषये स्पो ऽभिघाते प्रतिसंधानत्वात्प्र० प्राकृपत्यगावत् दृष्टिवदिति। अन्यथा ऽन्ये

न दृष्टस्यान्येनास्मरणात् प्रतिसंधानानुपपत्तेर्दृष्टानुपपत्तेर्विकारानुपपत्तिः। कारणाभावादिति। ननु तत्त्वादि

प्रयत्नवानधिष्ठाता शरीरमुपलभ्यः। तथा सिद्धदृष्टान्तबलेन विग्रहस्यापि तथा सत्त एवाधिष्ठानानुमानमुपि

तः। अनवस्था तथान्यैवमिति चेत्। तर्हि विग्रहस्य प्रयत्नवानस्तु। कृतं ततो ऽपधिकेनाधिष्ठात्रेति। नाप्रतिसं

धानत्तथाभावात्। शरीरस्य भेदेन तथात्वानुपपत्तिः। एतेन कार्यत्वादिना प्रागेव तस्यैव तत्प्रप्र

तिषेधात्। प्रतिषेत्स्यमानत्वा ऽ. त्वाच्चेति एवं कार्यत्वकरणमनुमाय गुणो गुणिनं ननुमिनोतीति सुखेति। तथाहि

सुखदुःखेच्छाद्याश्रिताः गुणत्वात् रूपवदिति द्रव्येतरः। ऽ नाश्रितत्वे द्रव्यान्तराश्रितत्वे वा गुणत्वबाधात्। सिद्धं गुणत्व लं ५

मेषां कार्यत्वे सत्यव्यापकत्वे सत्येकेन्द्रियग्राह्यत्वात् रूपवत्। कार्यस्य द्रव्यत्वे सति निरवयवत्वात् कर्तृत्वबाधात्

कर्मत्वे संयोगविभागानपेक्षकारणत्वप्रसंगात्। सामान्यादित्वे स्वच्छत्वबाधात्। तादिस्यादयस्तर्कोऽवहनीयाः। नव

त्वमीषां गुणत्वात् द्रव्याश्रितत्वं तथापि शरीराद्याश्रितत्वं इन्द्रियाश्रितत्वं वा न विप्रत्यतीस्यत आह। नेत्येति

कस्मादिति शिष्यस्याकांक्षायां हेतुनाह अहंकारैकवाक्यभावात्। सामानाधिकरण्येनानुभवाविरोधादित्यर्थः॥

ति ५

त ५

॥५८

५९

योऽहं सुखसाधनं स्रक्चंदनादिकमुपलब्धवान् तदुपादित्सुः प्रयतमानः तदुपलब्धवान् सोऽहं सुखी योऽहं दुःखसाधनमहि
कंटकादिमुपलभ्यापि न परिहृतवान् सोऽहं दुःखी योऽहं दुःखं सुखं वानुभूतवानस्मि सोऽहं तत्साधनमिदानीमुप
लभ्यादातुमिच्छामि द्वेष्मि वेत्येवं नेन क्रमेण प्रतिसंधीयमानाः खल्विमे गुणाः सुखादयोनुभूयंते दुःखप्रतिसंधीय
मानत्वममीषामनेकाश्रयत्वे तया विरुध्यते चैत्रस्य मैत्रसुखा[illegible]नुप्रतिसंधानादर्शनात् । तथा च शरीरेंद्रियाणाममीषा हि२
स्यहं प्रकरणानि भेदेन भिन्नत्वात् तद्गुणानाममीषामप्रतिसंधानप्रसंगात् भिन्नाश्रयाणामपि वाप्रतिसंधा
ने चैत्रमैत्रगुणानामपि प्रतिसंधानापत्तिः । न तु शरीरगुणा अपि प्रतिसंधीयंते स्वतद्घटना । योऽहं गौरः स्थू
लोऽभूवं सोऽहमिदानीं श्यामः कृशो दीर्घो वा इति । नातस्य भ्रांतत्वात् एकतमस्यापि प्रतिसंधानं भ्रांतं भवितीति
किं नः छिन्नमिति चेन्न । नास्मत्तुरभ्रांतत्वात् । अन्यस्येन दृष्टस्यान्येनास्मरणात् । अन्यथातिप्रसंगः । तस्मात् प्रतिसंधा
तुर्देहादिभ्योऽन्यत्वे सिद्धे तदधिकरणत्वेन सुखादीनामनुमीयमाने प्रयोगः सुखादयो न शरीरेंद्रियगुणाः अहंका
रेणासमानाधिकरणत्वात् । स्मृतिवदिति । स्यादेतत् प्रतिसंधानं तदवलेन स्मृतिबुद्धौ देहाद्यनधिकरणत्वं
सिद्ध्यतु देहादिभ्योऽप्यभेदे च प्रतिसंधातुः स्मर्तुर्वा समाप्यत्वात् । सुखादयस्तु क्रमजेप्य कदाचिद् देहे धर्मा स्युस्तत्रां

॥५८

तिवयादृहेकारसमानाधिकरणतयाप्रतिसंधानस्यं तदितिवेतुं न। ज्ञानेन भिन्नाधिकरणानां कार्यकारणभाव
नियमानुपपत्तेः। न च स्यान्योन्यान्यत्वप्रयुक्तिति। अन्यः प्रपतदितिसंभवति। तथात्वे चात्मैत्रे दृष्टं चैत्रे स्मितनिर्जैत्रो
पत्तेः। तस्मादेकाधिकरणत्वेनैवानीषां कार्यकारणभावनियमो नान्यथेति। हेत्वंतरमाह प्रदेशादर्शित्वादिति
देहाद्यव्यापकत्वादित्यर्थः। प्रयोगस्तु। सुखादयो न स्पर्शवद्विशेषगुणाः तदव्यापकत्वात्। ये पुनस्तद्विशे
षगुणा न ते तदव्यापकाः यथा रूपादय इति व्यतिरेकी। यद्वा संयोगवदित्यन्वयः। हेत्वंतरमाह अयावद्द्रव्यभा
वित्वादिति। सत्येव स्पर्शवति द्रव्ये निवर्तमानत्वादित्यर्थः। ये पुनः स्पर्शवद्विशेषगुणाः ते यावद्द्रव्यभाविनो
भवंति यथा रूपादय इति व्यतिरेकी। संयोगवदिति पूर्ववदन्वयः। अनयोस्तर्कः। यदि सुखादयः स्पर्शवद्विशे
षगुणाः भवेयुः अनियतबुद्धिकर्पोमूर्वेयुः। नियामकाभावात्। विषयविषयीभावस्य नियामकत्वे चैत्र
स्य बुद्ध्या मैत्रविषयित्वान्मैत्रस्यापि तत्सुखादेरुत्पादनप्रसंगादिति। स्यादेतत्। तथापि नात्मांहेतुस्वामि
द्विविशेषगुणत्वमनीषां निषिद्धं। शब्देन व्यभिचारात्। न हि शब्दो यावद्द्रव्यं भवति नापि श्रोत्रं आवर्तते। निमित्ताति
शयेन तत्संनिधिमपेक्षोत्पत्तेः। अन्यथापार्श्वस्थशब्दः प्रतीयते शब्द इति प्रसंगानुत्पन्नेति तोशब्दोस्याहेत्वंतर

माहबाह्येन्द्रियाप्रत्यक्षत्वादिति। मानसप्रत्यक्षत्वादित्यर्थः। नशरीरेन्द्रियागुणाः इच्छादयः मानसप्रत्यक्षत्वात् बु
द्धिवत्। ज्ञानवैयधिकरण्येन वा मीमांसकाभिमतप्रत्यक्षत्वप्रसंगः। तथापि वा प्रत्य[illegible]त्वे चैत्रेण मैत्रसमवेता
नामिच्छादीनामुपलंभापत्तिः शरीरादिगुणानाममीषां बाह्येन्द्रियग्राह्यत्वे रूपादिभिरनुपलंभप्रसंगः। म
नोग्राह्यत्वे वा तद्धर्मिणामस्मदादिभिरपि रूपाद्युपलंभापत्तिः। इंद्रियसामर्थ्यनियमाद्रूपरसादिवन्नियमो भवि
ष्यतीति चेन्न। मनसः सर्वविषयत्वात्। निपतन्बाह्यविषयत्वे मनस्यव्याघातात्। अहं युवा कामी यते सुखी
दुःखी वा स्पर्शेन सुखो वा पुरुषो[illegible]इति मनो मे दुःखितं मनसि मे हर्षः पादे मे सुखं शिरसि वेदनेत्यादिप्रत्य
यात्। शरीरेन्द्रियगुणत्वममीषां शंकितमिति तदेव प्रतिषिद्धमन्यगुणत्वे तु शंकैव नास्तीत्युपेक्षितवानात्मसंप्रति
पूर्वहेतूनां चेष्टादीनां रथकर्मणा व्यभिचारादित्यादिषु दृष्टं तेषु विशेषविरोधमानमपरिहाराय तत्प्रत्यक्षसिद्ध
त्वमिच्छति चिरे स्वात्मानमेव दृष्टं न पिष्टामहत्वमित्याधायप्रत्यक्षमाह तथाहमिति। अहमिति शब्देन प्रत्य
यमुपलक्षयति। यथा परमात्मानुमीयते। तथा प्रत्यक्षतोऽप्यहंप्रत्य[illegible]पेन स्वात्मा विषयीक्रियत इत्यर्थः। न
न्वहंप्रत्ययो लिंगजः शाब्दो वा तदनुसंधानमेतदौपजापमानत्वात्। ननु पृथिव्यादि[illegible]दिविषय एवाय

महंप्रत्ययो न विषयतीत्याशंक्य तन्नेमाह पृथिव्यादिशब्दव्यतिरेकादिति॥ पृथिव्यादित्वप्रत्यये वैयधिकरण्या
दित्यर्थः। एवं चाहंप्रत्ययः पृथिव्यादौ न भवेत्। अहं पृथिवी। अहमापः इत्याद्याकारो न भवेत्। इत्यादिप्रत्ययवत्
नत्वेवं स्यादेतत्। सामान्यतो मा भूत्। विशेषतस्तु न विषयतिपया काश्चित्पार्थिवो गोघटादिर्न सर्वः। तथा
तथैकश्चित्पार्थिवोऽहं मैत्र इति को विरोधः। न। अहंकारस्य प्रतिसंधातृत्वे विषयत्वात्। शरीरस्य च भेदे
नाप्रतिसंधातृत्वादित्युक्तत्वात्। तन्मात्रपरमाणवः स्थिरत्वात्प्रतिसंधातृत्वेनाहंकारविषया भविष्य
न्तीति चेत्। न। तेषामतीन्द्रियत्वात्। अपि च शरीरारम्भे वर्त्तते तस्य बाह्येन्द्रियत्वमापद्येत। तथा च चक्षु
रादिव्यापारापगमेऽहंप्रत्ययो न स्यात्। मानसत्वे शरीरस्य तद्गुणानां तगौरत्वादीनां मानसत्वप्रसंगः।
न हि निर्गुणं द्रव्यमुपलभ्यते। तथा बाधकादीनामहंप्रत्ययवत् रूपादिप्रत्ययापत्तेर्दशनिति तस्मात्पर
मार्थतः सामान्यतो विशेषतश्च सकलपृथिव्यादिप्रत्ययव्यतिरेकादहंप्रत्ययस्य इति सिद्धं मासंबन्धात्। तथा
च वैष्णादीनां हेतूनामात्माकार्यत्वे सिद्धे परमात्मनि तत्स्वारसिद्धिः। यथ वदित्यादो मक्षुरीरवदित्यादिविपरिणामे
नोदाहरणस्य निरूपद्रवत्वादिति सर्वमवदातं। तदेतदेव नाशिकैरुपन्यस्यते। बुद्धेर्हि कार्यस्य पद्मपादान

।५१।

5।

कारणमात्रमविवक्षितः स एव [illegible]नो बुद्ध्यंतरं । रूपरसादीनां गुणानामाश्रयो द्रव्यं तदपि प्रक्रियामात्रं । तत्तिक
त्वसिद्धावस्य षट्पदार्थीकाव्यस्य बालजलेनार्पत्वात् । तथा हि । [illegible]पलानतन्तुनिष्ठा कृपयाघटः
संख्यविवादाध्यक्षसितः शाङ्कादिरिति । स त्वं तावद्घटत्वं किंचिद्दत्तप्रकल्पितेनावर्थक्रियाकारित्वं बोधस्य
विवक्षितं । तत्र भावानां प्रत्यक्षसिद्धं । अक्रमेण क्रमयौगपद्याभ्यां । न हि क्रमाक्रमाभ्यामन्यः प्रकारः शक्तिक्रमपि क्रमात् ८
शक्यते । व्याघातस्फोटत्वात् त्वात् । [illegible] । न क्रमवृत्ति निषेधस्यैवाक्रमाभ्युपगमात् । नाक्रमवृत्ति निषेधस्यैव क्र
माभ्युपगमात् । न ह्यभ्युपगमेव प्रतिषिद्धो एकाकारं च वृद्धि । तौ च क्रमाक्रमौ । स्थिरो सं भवतो वर्थक्रियाम पि
ततोऽपि च वर्तिपतः वर्तमानार्थक्रियाकरणकाले हि अतीतानागतयोरर्थक्रिययोः समर्थत्वे तयोरपि क
रणप्रसंगात् । असमर्थत्वे तु पूर्वोत्तरकालयोरपि करणापत्तेः समर्थोऽप्यपेक्षणीयासन्निधेर्न करोतीति तत्सन्निधेः कु
करोतीति चेत् । अथ किं मर्थं सहकारिणमपेक्षते किं स्वरूपाभावार्थमुतोपकारार्थं अथवा कार्यार्थं न प्रथमः स्वरूपस्य स्वका
रणाधीनस्य नित्यस्य स्वरूपे च सिद्धत्वात् । न द्वितीयः स्वयं सामर्थ्ये असामर्थ्ये वा तस्यानुपयोगात् । सामर्थ्ये हि
स्वयमेव कार्यं कुर्यात् किं तेन । असामर्थ्ये तु सहकारिसहस्रेणापि न कुर्यात् । न तृतीयः किं तेन । एवं न तृतीयः । तप

कथं वस्तु सहकारिणामप्यनुपयोगादिति । अनेकाधीनस्वभावतया कार्यमेवापेक्ष्यत इति चेत् । न । तस्य सर्वतन्त्र
स्वातन्त्र्यात् । सर्वतन्त्रं एवाकार्यत्वप्रसङ्गात् । तद्धि तस्मात्कारणादपि स्यात् । तस्माद्दैवं न भवेदिति । अथ चाकेवलमपेक्षा नाम किं
तैः सह करोतीत्ययं स्वभावः परस्परसन्निधानः स्वभावभेदः । अथ तैर्विना न करोतीति व्यतिरेकनिष्ठं स्वरूपमेवाहो
स्वित्तैरुपकृतः करोतीत्युपकारभेदः । न प्रथमः । स्वभावस्य तादवस्थ्यात् । न हि तस्य सहकारिव्यावृत्तौ स्वभावव्या
वृत्तिः । ननु यत एव सहकारिव्यावृत्तौ अस्य स्वभावेन व्यावर्तते अत एव तैर्विना न करोति किं तु तैः सहैव सहै
व करोतीति स्वभावं लक्षयामः । स बहिः स्वभावभेदः । सहकारिसाहित्ये सति कार्यकरणे नियतः सहकारिणो न उपस्यात् ।
प्रस्तुतप्रमाणमानाऽनपि गलेपातेन बधा । अन्यथा स्वभावहानिप्रसंगात् । अत एव न द्वितीयः ।
अकर्तृस्वभावापरावृत्तेः । अथ तद्विरहाकर्तृस्व[illegible]वस्यात् । कालान्तरेऽपि स्वभाववशादुपसर्पन्तोऽपि सहकारिणः
पराननुपघ्नन् कुर्यात् । न तद्विरहाकर्तृशीलास्य[illegible] स्वत्वेऽयमिति । अथ सहकारिप्रसन्नकर्तृस्वभावात् तद्विरहे
ऽकर्तृरूपत्वमिति प्रायः । विरुद्धधर्माध्यासस्य हि तादवस्थ्यात् । तिंघात् । नवापं कालभेदेन परिहर्तुमशक्यः धर्मिणोन

ना

॥१२॥

तिरेकात्। अतिरेके वा स्यादसीन्यायवत्तेः। तथाहि। सामर्थ्यासामर्थ्याभ्यामन्योन्यधर्मी स्वरूपेण न किंचिदेव स्यात्। उप
कारपक्षे त्वनेकमुखानवस्था दुर्धरेति योपन्यासस्यापि न योग्यः। तथाह्युपकरोपकर्तव्ययोः सहकार्यकार्ययोरपेक्षा
उपकारपरंपरापातादिति चेत्। उपकारेणाप्युपकर्तव्यमिति तत्परंपरापाताद्दुस्पदा। कर्तव्यस्य चोपकारस्य धर्म
भेदे धर्मि[illegible]वक्तव्येत। भिन्नो तु धर्मिणः किमायातं। न ह्यन्यस्मिन् जाते नष्टे वा अन्यस्य[illegible] स्वरूपं किंचिद्भवत्य
तिप्रसंगात्। अनुपतेनापि तस्य किंचिदुपकारं तत्संधानाय यमिति तत्तीयानवस्था। स्यादेतत्। सहकारिको[illegible]याम
तिप्रसंगात्। उपकारपक्षेऽनवस्थानादिति। तथा पुंसां संज्ञोत्पत्तौ बीजमपि पवनपा[illegible]स्तोऽङ्कुरानुकरोतीति प
क्षे किं येनैव स्वभावेनांकुरं करोति तेनैव पवनादीनपेक्षते। अथ प्रथमः। कार्यानारंभेऽतिप्रसंगात्। न द्वितीयः। ए
कस्यापि हि तस्य स्वभावभेदापत्तेरिति। तदसि किं दृष्टान्तोऽसिनं। साहित्यकरणाय चदृष्टायां स्वपेक्षिणिकस्य पेक्ष
त्वादेवमसमर्थस्य सहकार्यमपि किंतु। अन्यथा तु निरपेक्षत्वमेवात्तैर्वर्णितं स्यात्। सत्वात्। सहकार्यनुपकार्यत्वाद्वा।
स्थिरस्वभावस्त्वेर्विनाप्यस्तीति समर्थः। किं न कुर्यादिति विशेषः। एकस्यैवानेककार्यकारिस्वभावस्य स्वकारणादुत्पत्तेः।

६ × भावः किं निरपेक्षः सापेक्षो वा। केवलात्संवत्सरसहस्रेणापि कार्यानुपपत्तेः न द्वितीय
अनुपकारापेक्ष ६

क्रे ३

कार्यभेदेन। स्वभावभेदापादनेऽस्यापि दूरनिरस्तत्वात्। न च स्थैर्यपक्षे प्रत्ययः [redacted] संभवति। तदुक्त
मेकरनंतरमेव तावत्कार्यकरणप्रसंगात्। तदैव तत्स्यात् स्वभावत्वादिति। एतेनैकजातीयत्वे एकदेशकालप्रसंगादपि
निरस्तो वेदितव्यो। तस्मात्क्रमयौगपद्याभ्यामर्थक्रियाविरहलिंगकाया वर्त्तमानार्थक्रियादशलोके विश्रा
म्यतीति प्रतिबंधसिद्धिः। अन्वयेन वा। यद्विरुद्धधर्माध्यस्तं तन्नाना। यथा शीतोष्णौ। क्षणभेदेन विरुद्धधर्माध्यस्तं
च विवादास्पदीभूतो भावः। न चायमसिद्धः। सामर्थ्यासामर्थ्ययोः प्रसंगतद्विपर्ययाभ्यां सिद्धत्वात्। तथाहि। यद्यदा
यज्जननसमर्थं तत्तदा करोत्येव। यथा सामग्री स्वकार्यं। समर्थश्चायं वर्त्तमानार्थक्रियाकरणकालेऽतीतानागत
योरप्यर्थक्रिययोरिति प्रसंगः स्वभावहेतुः। सामर्थ्यमात्रानुबंधित्वादर्थक्रियाकारित्वस्य। यद्यदा यन्न करोति तत्तदा
तत्र न समर्थं यथा शिलाशकलमंकुरे। न करोति चैष वर्त्तमानार्थक्रियाकरणकालेऽतीतानागतेऽप्यर्थक्रिये
इति व्यापकानुपलब्धिः प्रसंगविपर्ययइति। अत्र संक्षेपतः किंचिदुच्यते। सत्वं तावदसिद्धं व्याप्तिकतया व्याप्यत्वासि
द्धमसिद्धप्रभेदोऽस्माकं। संदिग्धविपक्षव्यावृत्तिकतया सं[illegible]दिग्धानैकांतिकमनैकांतिकप्रभेदो बौद्धस्यानैकांतिकु
र्वद्रूपत्वा[illegible]क्षेपकरणाच्चर्मेऽस्य स्वनंतरक्षणिकत्वादिक्षणहृ[illegible]दन्यादृशां सामग्रीमुपादाय प्रसंगाद्येककार्यस्यतपाठे

१ -मा १

॥५३॥ तस्य संदिह्यते नन्वेवं सत्त्वे भावस्य [illegible]त्यक्षमनुमानं वा संभवति । सहकारिषु सत्सु करोति तैर्विना न करोतीत्यन्वयमस्य स्वभा
वोदर्शीनानति क्रमेणाभ्युपगम्यते । अ[illegible] विरोधस्तु । अन्वयवादिसिद्धत्वाच्च । व्यवस्थैव तद्वश्याभ्युपगमनीया । द्वितीय[illegible]कोपि हि भावः कु
र्वद्रूपः सहकारिभिः सहैव करोतीति नियमतः स्वभावः । अन्यथा [illegible] सहकारिणामसहकारित्वप्रसंगात् । ततोन्वयनियमेन तैर्वि
ना न करोती[illegible]त्येवेति व्यतिरेकोप्यवर्जनीयः । अन्वयव्यतिरेकयोरन्यतरस्य नियमस्यान्यतरस्यासिद्धिर्नान्त[illegible]दियक
ति ५ त्वादिदं बौद्धस्य चेतः । तथा च तैर्विनाकृतस्य करणमापद्यमानमापद्यकमेव व्याहन्तीति । नन्वन्त्योस्तं तैः सहैव करोतीति स्वभावा
भ्युपगमे सहका[illegible]रिणो न ज्ञाप्यातुं च स्तुतपानायमानानविगलेपाशेन बध्वा कृष्या नयेदिति । सत्यमुक्तमात्मानमवीक्ष्य मा
केन ततु तु प्रत्य[illegible]पितं । तथापि व्यतिरेकनियमे सहकारिणः स्वकारणादापतन्तो निवार्यं न कुर्युः । तैर्विना न करोतीत्यय
[illegible]मस्य स्वभावः । अथ तैः सहैव करोतीत्ययमस्य स्वभावः । एवं तर्हि विरोधः स्यात् । स्यादेतत् । स्वकारणाधीनसन्निधयः स
हकारिणस्तेषामुपनयापनययोरयमनीश्वरः । यथोपनिबन्धेन तु [illegible]त्यते । यदि सहकारिणो न स्युः न कुर्यादिति न तु तेन तदा
नीं सन्तीति । तैर्विना समर्थो नास्य स्वभाव व्यतिरेकेणान्वस्माकं मत्येव मस्त । स्वकारणाधीनसन्निधीनां सहकारिणामु
पनयापनययोरयमीश्वरः स्वयथोपनिबन्धेन न तु [illegible]न्वेतो । यदि सहकारिणः स्युः कुर्यान्न तु तेन तदानीं सन्तीति । स्यादेतत् । ॥५३॥

तैः सहैव करोतीति तैर्विना न करोतीति त्वयमस्य स्वभाववृत्त्या वेधाः समो स्तुपगमः॥ किं त्वयं विशेषः तैः सहैव करोतीति (अयम
स्य स्वभावः स पश्चाद् इत्थं न वा। प्रथमे पश्चादपि कुर्यात् तु द्वितीये त्वस्मन्नयापातद्वृत्तिः॥ अथ तत्र वा विमतैः तैः सह कुर्वतो
पि यस्य स्वभावस्तैर्विना न करोतीति स यदा क्षितदा न कुर्यादेव नास्ति वेत्तु। व्यतिरेकव्याप्तिज्ञानेऽन्वयव्याप्तिवृत्ति
५ रा दिति स्वैपद्दानिप्रसंगः॥ स्वरूपमस्येव तैर्विना भावमात्रं तु नास्त्येवेति वेत्तु। समापि तत्र तत्काले स्वरूपमस्तित्वस्या
हि समात्रं नास्तीति समः समाधिः। तस्मात् सह कुर्यादन्वयव्यतिरेकोपलक्षितमपेक्षितं तं वक्तव्येन स्वरूपमेव तावान
नां तादृशमे वसामर्थ्ये पदार्थः तदेव सहकार्यन्वयमपेक्ष्य कुर्वदित्युच्यते। तद्व्यतिरेके कं न पेक्ष्य का कुर्वीदिति युक्तं तु
त्वरूपामः अस्त्वेवासमर्थो समर्थस्य [illegible] भावः तथापि क्षणिकपक्षे एव कालेऽनेनाविरोधस्तु प्रसिद्धो विरुद्ध
मोध्यासः। कथं। यदापि हि क्षणिको भावः स्वकालस्य एककामपि कं चिदर्थक्रियां करोतीति। तदा नानेवार्थक्रियां का लान्तरे
पि किन्न करोतीति परिणामवयात्। असत्वादिति वेत्तु। किमन्त्वसत्वेन। न हि सत्वप्रयुक्तं कारणं। तथा स इति देशान्तरेपि
कुर्यात्। तस्मात्तत्र कालेपि देशेवा सत्वे वा मा। तत्तु यदि समर्थस्तदा कुर्यादेवा। अतएव स्वज्ञानं ति कं [illegible] विज्ञानं प्रभृत्यन्त
रेनमपि सुषुप्तस्य जागरावद्ध्ज्ञानमुत्पादयतीति प्रज्ञाकराः। अकामयैव नकरो [illegible] तीति वे, तु स्थिरे पेवमेवादावो

54

मस्त्वाऽसत्त्वमेवासामर्थ्यमिति चेन्न। तत्कालाऽसत्त्वात्। समस्त[illegible]कालस्यैव तदा तामेवार्थक्रियां कुर्वाणो गीर्वाण
शापेनापि नापह्नवयितुं शक्यते। किं पुनस्तावामुनानर्मपीडाजनितवि[illegible]कृपविक्रोशमात्रेणाऽसामर्थ्ये तदापि न कुर्या
त्। किं वा तस्य मते सत्त्वमपि वक्तुं नास्ति किंतु स एव भावः। तदा वचनं न विरुद्धधर्माध्यासः। एवं स्वविधिनिषेधस्वभावत्वा
नुपपत्तेः। कानुपपत्तिः संप्रत्येतदयमस्ति कालान्तरे च नास्तीति चेन्न। सामर्थ्यासामर्थ्ययोरप्येवमस्तु। प्रथमं समर्थस्या
समर्थस्य वा पश्चात्स्वभावविपर्ययः कुतस्त्यागादिति चेन्न। प्रथमं सतोऽसतो वा पश्चात्स्वभावविपर्ययः कुतस्त्यागत
इति तुल्योऽनुयोगः। न चायं स्वभावविपर्ययः किंतु स्वदेशकालस्यैव चान्यदेशकालयोरसत्त्वमवस्थाकारादिस्वकारणादे
वायातमिति चेन्न। ममापि नामार्थक्रियां प्रति इदानीं समर्थोऽन्यदाऽसमर्थ इति स्वकारणादेवायातमिति तुल्यं। तस्मात्सार्थ
क्रियानेन न तदैव कर्तव्या नान्यदेति स्वभावनियमो ह्युभयोर्दर्शनयोः समानः। अन्यदा तु न कर्त्तव्यैवेति क्षणिकपक्षेऽन्य
न्यदैव कर्त्तव्येति स्थिरपक्षे इति विशेषः। न चान्यदान्यकरणात् तदा तत्करणयोः कश्चिद्विरोधो येन देशभेदेनार्थक्रियाभेदे
ऽपि भवदुपपत्तेः। तस्माद्देशकालविषयभेदेन करणाकरणे सामर्थ्यासामर्थ्ये विरुद्धे एव न भवत इत्यन्योन्यसर्वविरुद्ध
धर्माननुसर्तव्यः। स यत्र नास्ति तत्र तत्र हेतुत्वं न वधेरपि गगनादेरप्यनेकत्वानुसर्तव्यमिति रहस्यं। विस्तरस्त्वात्मतत्त्वविवेके

 नं: ८

न्यायकुसुमांजलौ वा ऽत्र नत्र सन्निधिप्रामाणत्वादिति। एवं स्थैर्यसिद्धौ न बुद्धिबुद्धेरूपादानां गुणत्वात्। अनवगुणगुणिनो
रभेदः विरुद्धधर्माध्यासादिति संक्षेपः। यतः सर्वं सुखं स्यादेतत्। तत्किं सुखादयस्त्वात्मनो गुणाः तैरेव गुणैरनुमातव्यः
न त्वेवं बुध्यदृष्टादीनामगुणत्वे ऽन्यगुणत्वे वा बहुविप्रवेन। सुखादीनाम[illegible]त्मगुणत्वं न सिध्येत्। संयोगाद्यन्तावे
तेषां तद्गुणानां कदाचित्कत्वानुपपत्तेरित्याशंक्याह। तस्य गुणा इति। तेषां प्रत्यक्षसिद्धत्वेपि गौरवान् स्वत्रकारानुमति
माह। आत्मलिंगाधिकारे इति। ज्ञानादित्वे बुद्ध्यादयः प्रयत्नांताः सिद्धाः यद्यपि बुद्धिस्तत्रैकं त्वेनानाग्नितथापि सु
खादय एव स्वकारणात्तथा नामान्विपंति। न ह्यन्यसमवेतयेष्वबुद्ध्यान्यस्य सुखादिकमुत्पद्यते। तथा त्वे देवदत्तेनैवं द
नस्पर्शमनुभवति। यज्ञदत्तस्य सुखमुत्पद्यते। इंद्रियांतरविकारश्चे न पद्दृष्टि त्वं विवक्षितं बुद्धिगुणत्वमात्मनो दृष्टि
ति। तन्मिभावः। धर्माधर्मौ वात्मांतरगुणानामकारणावचनादिति। विहितनिषिद्धावर्णत्वेन धर्माधर्मौ जायेते। विरुद्ध
त्वात् कर्मतः कालांतरभाविफलहेतुत्वानुपपत्तेः। तौ कुत्र जायेते। नित्यपेक्षायां स्वत्रकारेणोक्तं ऽत्रात्मांतरगुणा
नामात्मांतरगुणेष्वकारणत्वादिति। अस्यार्थः। अन्यसमवेतादृष्टधर्माधर्मैरन्यस्य सुखानुपपत्तेः। तत्सन्निवाक्
१ तत्तनिरक्तः तान्यागमप्रसंगात्। न वान्यसमवेतत्वेपि तेषां तत्कर्तृत्वात्। न हि दृष्टवैदृष्टेन तत्कर्तृत्वं कर्मणोनिवर्तते। तद्वयं प्रमा
१४ तत्त्व[illegible] लिंगादिष्वपि प्रसंगात्। दृष्टः प्रयोजनाद्वेष[illegible]तत्त्वेपि ४१

55 णार्थः। देवदत्तविशेषगुणप्रेरितभूतकार्याः स्युर्देहाताश्चशरीरावयवाः। कार्यत्वे सति तद्भोगसाधनत्वात्। गृहादिव
दिति। ज्ञानेच्छाप्रयत्नानां तु यज्ञास्यामपि पुत्रपौत्रगामिफलत्वसिद्धिः। तदाश्रयापूर्वत्वेन नद्यादेर्वैयर्थ्यमनिवारः। अन्यकृतेन
चकर्मणोऽन्यत्रापूर्वोत्पत्तिरिति वशास्त्रसिद्धा रक्षा वृथादिवदिति। तदेवं धर्माधर्मावात्मगुणावनुमेयानुमतौ। संस्कारेण
तु५ दनुमतिमाह संस्कारः ॥ स्मृतेस्त्यदावितिः। अनेनात्मसंयोगात्संस्कारोऽत्र स्मृतिरिति स्मरणं स्मारयति। न चान्यत्रसंस्कारे
णान्यत्र स्मृतिः देवदत्तेनानुभूते यज्ञदत्तस्मरणप्रसंगात्। अतोऽनुभवसमानाश्रयसंस्कारः सिद्ध इत्यर्थः। व्यवस्थाव
चनात्संख्येति। नानात्मानो व्यवस्थात इति सूत्रं दर्शितं। द्वित्वेन सामान्यतः संख्यायां सिद्धायां किंपुनरित्यादिबहुत्वं वत्५
उताकाशवदेकत्वमेवेत्यतो नानात्वे दर्शिते नांतरीयकतया बहुत्वसंख्या दर्शितेत्यर्थः। अथ कोऽयं व्यवस्थानियमः। प्र
वे५ यमस्मात्कश्चित्संसरति। कश्चिदपवृज्यत इति यद्येक एवात्मा अमुकः प्रज्ञादेवापवृज्यते इति कोऽपरः संसरेत्। न वै
यतः कोऽनेनापवृज्यते एव कश्चित्। तथा सति नापवृज्यतेव। न चैवं नादौ संसारे पत्नवर्त्तितं तद् कल्पितं। नैसंगवादिनं
च बंधमोक्षावेकस्य सं[illegible]भवतः; विरोधात्। अपरा च व्यवस्था कश्चिदीश्वरः कश्चिदनीश्वर इति। न चेश्वरो जगति
नास्ति। तज्ञावेपत्यस्य कृतत्वात्‌ नापसमद्दादपः स्वात्मनिष्ठानुं सर्वकर्तृत्वापक्षेति। उपर[illegible]शापापेक्षत्वादिकाविषा ॥५५॥

२ ४ पि सुखदुःखे स्यातां को दोषः। न ब्रूमः। एकस्य सुखदुःखे न संभवतः किंतु यो हि देवदत्तः सुखी सोऽहं यज्ञदत्तो दुः

ताद्येति। अन्यथा व्यवस्था कश्चिद्दुःखी कश्चित्सुखीत्यादि नोपपादेमे सुखं विभ्रमसि मे वेदनेत्यादिवत् शरीरभेदेनैकस्या

सुखी त्यिप्रतिसंधानं स्यादिति ब्रूमः। अप्रतिसंधानमपि शरीरभेदेनोपपद्यते जन्मान्तरसुखादिवदिति चेन्न। तत्र

संस्कारस्यासत्वादभिभवाद्वानुद्बोधाद्वा तदुपपत्तेः। न चैवमिहापि स्यादिति। यज्ञदत्तवद्देवदत्तेनाप्यप्रतिसंधानप्रसंगा

त्। अविद्यावशात्। आत्मनो पि दुःखादयो प्यात्मीयत्वाभिमानप्रतीयंत इति चेन्न। नायज्ञदत्तदेवदत्तेनात्मीयतयाप्यप्रतिप

त्तिसंगात्। परमविदुषेश्वरेणास्मदादिदुःखस्यात्मीयतयाप्रतिसंधानापत्तेश्च। एतेन जीवात्मनामीयं व्यवस्थानुपर

ब्रह्मण इति निरस्तं। यतो व्यवस्था तत्त्वात्मानस्तत्त्वतो भिन्ना एवेति स्थितं। परब्रह्मणि वेश्वरादन्यस्मिन्नप्रमाणा

भावात्। ऐकात्म्यश्रुतिविरोध इति नास्ति। मुमुक्षूणां सर्वं विहाय स्वात्मप्रनिष्ठेन भवितव्यं। न त्वेक एवेति तात्पर्या

दिति। एवमुत्तमनयत एवेति यतः संख्यानत्वसिद्धाः। अतः पृथक्त्वमपि संख्यानुविधानात्तत्स्वतस्त्वर्थः। द्रव्यत्वेन परिमाणापो

जेसस्याह। तथावात्मेति। वचनादिति। विभवानुमाह। नाकाशस्तथात्मेति सूत्रं स्मारयति। विभुत्वाद्यथाकाशो म

हानेतथावतदेव विभुत्वादात्मा महानित्यर्थः। विभुत्वमेव तस्य कुत इति चेत्। तत्कार्यस्य ज्ञानसुखादेः सर्वत्र दर्शना

त्। शरीरस्य जात्यैव तदुपपन्नमिति चेन्न। अनन्यत्वात्। एतदपि कुत इति चेत्। परमाणुत्वे प्रत्यक्षत्वासंगात्। प्रत्य

५६॥
५५

कृगुणानधिकरणत्वप्रसंगात्। अवयवित्वे ऽनित्यत्वप्रसंगात्। आदिमत्त्वयावीतरागजन्मापत्तेश्चेति। एवं सत्कारा
नुमतिप्रदर्शनकौशलेन बुध्यादिगुणपरिमाणां तेषु प्रमाणाभावदर्शितम्। संप्रति संयोगविभागवान् आत्मा द्रव्यत्वात् पृ
थिवीवदिति। प्रमाणास्य तर्कमाह सन्निकर्षजत्वादिति। सहकारी कार्यान्तरानपेक्षस्यात्मनः सुखादिकारणत्वे तेषां सततो
त्पत्तिप्रसंगात्। निमित्तमात्रापेक्षितत्वेऽपि सर्वत्रोत्पत्तिप्रसंगात्। तथा च शरीरावच्छेदेन तदुत्पत्तिनियमो न स्यात्। शरी
राणामवच्छेदकस्य संयोगादन्यस्यानुपपत्तेः। एवं मनःसंयोगोऽसमवायिकारणत्वेन व्याख्यातः। अदृष्टवदात्मसंयोगश्च
ज्वलनपवनादिक्रियाकारणत्वेन बोद्धव्यः। तद्विनाशकत्वाद्विभाग इति। यथात्मनि विभागो न स्यात् तस्यान्योऽपि संयो
गो न स्येत्। आश्रयनाशासंभवादिभावः। ॥ मनस्त्वाभिसंबंधन्मन इति। मनस्त्वं नाम सामान्यविशेषः। तदभिसंबं
धान्मन इतरेभ्यो भिद्यत इत्यर्थः। ननु मनस्त्वासिद्धं कुतो मनस्त्वमित्यत आह सत्यपीति। यस्मिन् सत्यपि कदाचि
न्न भवति तत्तस्मादन्यदिति विज्ञापेक्षं यथा सत्यपि तुर्यादिसन्निकर्षे कदाचिद् भवन्पटस्तदन्यदिति दिक्के कुं विद्याद्यपेक्षः। सत्यपि वात्मे
न्द्रियार्थसन्निकर्षे कदाचिद् ज्ञानादिकं भवति न तस्मात्तदतिरिक्तापेक्षममुयच्च तदपेक्षणीयं तदेव मनः। इत्यर्थः। अपेक्षणीयान्त
राभावे सततं कार्यं स्यादप्रसंगात्। असंगे चैतन्नापेक्षणीयं। तथा च केचिद्योगपद्याभिमानः शतपत्रपत्रशतव्यतिभेदवद

प्रमावाद्दूहनीयाः ॥ अदृष्टमपेक्ष्यतामीयं न विषयतीति चेन्न । नादृष्टस्य कायकवक्त्रसाक्षात्वे तदसन्निधाने नानुपपत्तेः । तदसं
न्निधेस्तदितरस्यानुपपत्तिः ॥ लिंगं तत्र माह श्रोत्रादीति । स्मृतिः शारीरावच्छिन्नात्मनःसंयुक्तेन्द्रियसाध्या कार्यत्वे सति गुणत्वा
विशेषगुणत्वात् । रूपादिज्ञानवत् । पक्षे तु यत्तदूर्ध्वं तन्मनः श्रोत्रादिष्वन्यतरत् न त्वविषयतीति चेन्न । अतत उक्तं श्रोत्राद्यग ॥
पारद्वति । अन्यथा उभयमवापि करणानामवेतदनुत्पादप्रसंगात् । विषयविप्रकर्षाद्व्यतद्धापाद्यः । परमोऽत्र दूषणापः
लिंगं तत्र माह बाह्येन्द्रियेति । सुखाद्युपलब्धिः इन्द्रियसाध्या अन्यसाक्षात्कारित्वात् । रूपाद्युपलब्धिवत् । श्रोत्रादिक
मेव तत्साधनं न विषयतीत्यत उक्तं बाह्येन्द्रियैरग्राह्यतेति । पृथ्व्यादिबाह्येन्द्रियैः श्रोत्रादिभिः सुखादयो ग्र
ह्येरन्नु । अन्धबधिरादिभिर्नोपलभ्येरन् स्युरित्यर्थः । सुखादीनां बुद्धेरन्यत्वं बुद्धेः स्वसंवेद्यत्वं च वक्ष्यतो एवं सिद्धे
मनसि व्यक्तिभेदासिद्धेः सत्यां नियतकार्यतया मनस्त्वमपि सेत्स्यतीत्यभिप्रायवान् तत्परस्य गुणान् आह तस्येति । यद्यपि आत्मि
कादेः संख्यादिपंचकं सिद्धं तथापि सूत्रकारानुमतिप्रदर्शनव्याजेन विशेषं विवक्षन्नाह प्रयत्नेति ॥ अणुत्वेऽपि मनसां
बहुत्वमपि सिद्धं । अन्यथा एकस्मिन्नेकत्ववर्तमाने शरीरान्तरे तत्कार्यं ज्ञानादिकं न स्यात् ॥ अतो बहुत्वे सत्येकस्मिन्न
पि शरीरे तैर्बहुभिर्युगपज्ज्ञानोत्पत्तिप्रसंगान्न द्वयं स्यः । तदत्र मेकमेव विभुत्वं दस्त्वित्याशंक्य सूत्रे कृतोऽप्रयत्न ॥

घ्ना ४

नायौगपद्यादेकं मन इति। एकैकस्मिन्शरीरे एकैकमेव मनः प्रयत्नायौगपद्यात् ज्ञानायौगपद्याच्च। अणुत्वञ्च निःशरी
रमेकत्वमप्यनुमातव्यमित्यर्थः। पृथक्त्वमप्यत एव। संख्यानुविधानादेवेत्यर्थः। तदभाववत्त्वादणुपरिमाणं। तदभा
वादणु मन इति सूत्रकारवचनात्। तच्छेदेन पूर्वोक्तं वैभवं परास्तमिति। तेन विभवादित्यर्थः। विभवाभावश्च ज्ञानायौग
पद्यात्। विभवेऽस्यैकेन्द्रियग्राह्यवनानेन्द्रियग्राह्या अपि रूपादयो विषयाः सकृदेव ज्ञायेरन्। कारणयौगपद्यात्। शी नावा
एतेन स्पर्शशून्यत्वादयः परेषां विभुत्वहेतवः कालात्ययापदिष्टा वेदितव्याः। यद्येवमणु मनः कथं तर्हि दीर्घशष्कुली
न्नानामपि ग्रहणं गन्धादिशरीराणामुत्पतद्बोधदर्शनात् पसर्यणाद्विवेष्टाविशेषाः। नह्यविभुनैकेनानेकाधिष्ठान
संभव इति चेत्। न। तत्तदृशामपूर्वोत्पत्तेः प्रयत्नवशात्क्रमोपगृहीतातः करणवशादेवेति न किञ्चित्। अपसर्पणो
पसर्पणवचनात् संयोगविभागाविति। अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तरसंयोगाश्चादृ
ष्टकारिता इति सूत्रकारवचनात्। अपसर्पणं पूर्वशरीरविभागहेतुर्मनःकर्म। उपसर्पणमुत्तरशरीरप्राप्तिहेतु
र्मनःकर्म। ततः संयोगविभागौ सिद्धौ। अन्यथा तदनुत्पत्तेः प्रेत्यभावानुपपत्तिप्रसङ्गादिति भावः। स्यादेतत्।
मनसोऽतीन्द्रियत्वात्परापरव्यवहारयोगात्। प्रयत्नादृष्टोपग्रहाच्च क्रियोपपत्तेः परत्वापरत्ववेगाश्चाभ्युपगन्तव्या निर्बी॥

जइत्यत आह मूर्तत्वादिति। मूर्तत्वस्य तैः सहस्वभावतः संबंधाभावेन तेऽनुमातव्याः। नहि प्रात्यक्षिक एव संव्यवहारभि
यिमः धूमाद्यनुमितेवह्न्यादौ तदव्यवहारप्रसंगात्। नाप्यदृष्टाद्युपग्रहेण क्रियोत्पत्तौ वेगो न स्यात्। त्वचेनपवनादौ
तदभावप्रसंगादिति भावः। स्यादेतत्। मूर्तत्वात्तु द्रव्यारंभकत्वं मनसः किं न स्यादित्यत आह स्पर्शवत्त्वादिति
नहि मूर्तत्वस्य द्रव्यारंभकत्वेन सहस्वाभाविकः संबंधो विपक्षे बाधकाभावात्। स्पर्शवत्त्वं द्रव्यारंभकत्वेप्र
योजकं द्रव्यान्तरं ते स्पर्शवत्त्वाप्रामाण्याभावात्। अनुपभोग्यत्वप्रसंगाच्च तदीयकार्यान्तरस्याप्यभाव इति। न च
मूर्तत्वेन स्पर्शोऽनुमातव्यः। तदृष्टिविरहेण चामूर्तत्वं मूर्तत्वस्य स्पर्शविरहे विरोधाभावात्। विभवाभाव
स्य परममहत्त्वेन सह … विरोधादित्याह क्रियावत्त्वान्मूर्तमनइति। प्रक्रमात्। क्रियावत्त्वेनावैभवं तेनुपप
पत्ति। स्यादेतत्। करणत्वेन मनसः पूर्वं ज्ञातत्वं प्रतिविद्धं तदनुपपन्नं ज्ञानकरणत्वज्ञातत्वयोर्विरोधाभावा
त्। यद्यपि कुठारादेरपि कथमेकत्वमिति चेत्। तथापि नेदोषः। कुतस्त्वज्ञातत्वमत आह साधारणेति। तथा चैक
जिह्वायेणावरन्निनिवर्त्यतीन स्यातां प्रत्युक्तत्वप्रायविरोधेन प्रवृत्तिर्निवृत्तिश्च स्यादिति भावः। पदोदमहेनत
हि स्वार्थगुणानतः स्वरूपतश्चान्यपरार्थताऽतीन्द्रियत्वादत आह करणेति। भावाच्चेति। तथापि मूर्तस्य विशेषगुणादौ …

स्यात्। अन्यथा द्रव्यत्वमपि न स्यात्॥ मूर्त्तत्वविसमानाधिकरण॥ स्पद्रव्यत्वस्य विशेषगुणव्याप्यत्वादत आह गुणवत्त्व
द्रव्यमिति। अविभुत्वात् मूर्त्तत्वेपि गुणवत्वाद्विशेषगुणरहितस्या [illegible] द्रव्यत्वाविरोध इत्यर्थः॥ तथापि गुणव
त्त्वत्वस्थितस्या[illegible]पकारो वेकथं क्रियावत्त्ववेगस्य क्रियोत्तरकालीनत्वात्। नहि मूर्त्तत्वमात्रे क्रिया इत्यत आह
प्रयत्नाद्दृष्टपरिग्रहादिति। क्वचित्प्रयत्नपरिग्रहात् क्वचिददृष्टपरिग्रहादित्यर्थः॥ इति शास्त्रे अध्यपदिसमाप्तौ॥ ए
[illegible]जस्य संसिद्धिफलं मूलं वशो ननं विना गोनित्यता चेति द्रव्याणामत्र कीर्त्तनं॥१॥ इत्युदयनाचार्यकृतौ। कद्र
[illegible]न्वाद्रव्यपदार्थः॥ श्री ठ श्री के श्री वि संवत् १६८८ वर्षे आट सुदि पौर्णमासी गुरुवासरे अविमुक्तवाराण
स्यां आत्मपठनार्थं लेखितं पुस्तकमिदं शुभं भवतु॥ भवानिशंकराभ्यां नमः॥ श्री विश्वेश्वरो जयति॥ श्री ठ

॥श्रीमत पं० परसुराम सुत [illegible] स्वेदं पुस्तकं॥

१८००

पत्रे ५५